त्युशनाब्रवीद्धरिरियं पात्रं किमस्मात्परं मित्येवं बलिना चिंतितो मरव प्रभुः स्वपायात्सवो वामनः ॥ २९ ॥
जलं गृहीत्वा स्वकरे वामनो वर्धे तदा ॥ कूर्मपृष्ठे पदं न्यस्य द्वितीयं ब्रह्मणः पदे ॥ ३० ॥ तृतीयस्य
स्थलं नास्ति बलेः पृष्ठे पदं ददौ ॥ बलिं सपरिवारं तं पातालमनयद्विभुः ॥ ३१ ॥ ब्रह्मादिपदप्राप्य
यो स्वपदे समुपागते ॥ अस्य पूजा मया कार्येत्येवं संविदधे मतिं ॥ ३२ ॥ सर्वस्य मासमनो वारिक्रमं

डलुगते विधिः॥ अर्घ्यायकल्पयन्तस्य ब्रह्मलोकपितामहः॥२३॥ ततः स्तत्पतितं वारी मेरोर्मूर्द्धिनरा
धिप॥ चतुर्धा त्वभवत्सर्वं पश्चिमे दक्षिणोत्तरे॥२४॥ दक्षिणे यत्तु पतितं जटाभिः शंकरो बभौ तत्॥
गृहीत्वा उत्तरे पतितं यत्तु विष्णुर्जग्राह तज्जलं॥२५॥ पश्चिमे पतितं यत्तु ब्रह्मा जग्राह तज्जलं॥
पूर्वस्मिन्नपतद्यो देवा पितरो लोकपालकाः॥ जगृहुः शुभदं वारि तस्मात्श्रेष्ठं तदुच्यते॥ यो दक्षिण
दिशां प्राप्ता आपो वै लोकमातरः॥२६॥ विष्णुपादप्रसृतास्ताः क्रमं डलु गताश्च याः॥ महेश्वरकर
स्पर्शात् पावनास्ता बभूवतुः॥२८॥ तासां प्रभावस्मरणात् सर्वान्कामानवाप्नुयात्॥२९॥ इति श्रीप
द्मपुराणे त्र्यंबकक्षेत्रमाहात्म्ये नवमोध्यायः॥९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ नंद्युवाच॥
यथा नीता पुरा तेन गौतमेन महात्मना॥ तत्सर्वं विस्तरेणाहं वदिष्ये प्रीतये तव॥१॥ यस्मिन्नस्मि
न्नेव सुरश्रेष्ठ न्नद्यस्य तु गौतमस्य भवत्प्रिया॥ तस्मिन्नेवाश्रमे वद्धंगा प्रियायां शंभोर्महामते॥२॥ भो
तुर्दोषात् पुनः समर्थं चिंतयानः सदाशिवः॥ उमया सहितः श्रीमान्देवी प्रेक्ष्य विशेष
तः॥ रसव्यत्नोस्थितो यस्मान्निर्ममे रसमुत्तमं॥ रसवंतां प्रियतमां अस्त्रेण ता

न्यावनतत:॥ सर्वश्यो पघिता प्रीयागंगाभ्रन्न्तपस्त चीम॥ तामेवचिंत्यमानोसौ
सर्वदास्तेमहेश्वरः॥ सैव गंगा जटामागात्कस्मिंश्चित्कोरपांतरे॥ सतु संगोपय
न्मा स गंगां शंभुर्जटास्थितां॥ शिरस्याच्छतां लात्वानेरारगात्कउमातदा॥
स्कोढुंबन्न्लस्लटाजंदेस्थितांदृष्ट्वापुनः पुनः॥ अमर्षेणाभवं गौरी प्रष्टुमेवम
भाषता॥ नैनाथासोप्राहिणाच्छंभुरसिकोरसमुत्तमं॥ उमातदाच्चदुःखार्त्ता
संचिंतयाविनैतदा॥ जटास्थेन तदादेवी गोपनीयं विमृश्य सा॥ विनायकं ज
या स्कंदं रहो वाक्यमथाब्रवीत्॥ पार्वत्युवाच॥ नैनायंत्रिदशेशानो गंगायज
ति पुत्रकौ॥१०॥ सापि प्रियाशिवस्याद्याकथंत्यजति तां शिवः॥ एवं विमृ
श्य बहुशो गौरी प्राह विनायकं॥ न देवैर्नासुरैर्यक्षैर्नराजभिरथापिवा॥
भवता वाथ वान्येवा गंगायास्त्यजति स प्रभुः॥ पुनतश्च्यामि वागत्वा हिम
॥२०॥

गौतमस्य वचः श्रुत्वा यथास्थानं ययुर्द्विजाः॥ नंदी उवाच॥ अहिल्यां मोचयित्वा
तु तान्मोक्तुं सागरं ययौ॥ अहिल्यासंगमं नाम तत्तीर्थं भुवि प्रथे॥ तत्र स्ना
नं च दानं च कोटियज्ञफलप्रदं॥ एवं सागरमागत्य पर्वतादि महर्षिणं॥ शाप
मोक्षं च कारासौ तेषां नत्वा वक्ष्यविरे॥ तीर्थानि नरपशार्दूल पावनानि महीत
तले॥ तत्र स्नानं च दानं च कोटियज्ञफलप्रदं॥ माहात्म्यं तस्य तीर्थस्य
मया वक्तुं न शक्यते॥ गंगाद्वारकुशावर्ते गंगासागरसंगमे॥ सर्वत्र सुल
भा गंगा त्रिषु स्थानेषु दुर्लभा॥ इति ते कथितं सर्वं गंगामाहात्म्यमादितः॥
आनीता पृथिवीं गंगा गौतमेन महर्षिणा॥ शिवनिर्माल्यदोषेण मुनयो ना
रदसानूहितान्म॥ गौतमो पिहितं सर्वं गौतमाय निवेदयतु॥ त्र्यंबकः कृपया
मासः विष्णुं प्रार्थय गौतमा गंगाद्वारं समागम्य विष्णु स्नानं चकार इति॥
॥

२

तस्यां गसंगमात्रेण गंगा स्रुता भविष्यति ॥ त्र्यंबकस्य वचः श्रुत्वा गौतमो तप
सि स्थितः ॥ विष्णु माराधयामास विष्णुसूक्तैरनेकधा ॥ अल्पेनैव च कालेन वि
ष्णुमौंरीधंयांमासं विस्कृष्टो ब्रवीद्वचः ॥ विष्णुरुवाच ॥ तुष्टोहमेकभावेन न
रं वरय गौतम ॥ रक्षितं ते प्रदास्यामि यद्यपि स्यात्सुदुर्लभं ॥ गौतम उवाच ॥ य
दि तुष्टोसि देवे सा पवित्रं कुरु गौतमी ॥ गंगाद्वारं समागत्य स्नानं कुरु मनाऽऽप्यया ॥
गौतमा च तथेत्युक्त्वा विष्णुरंतरधीयत ॥ एतस्मिन्नंतरे राजन्नू हिरण्याक्षो म
हासुरः ॥ यज्ञानादाय देवेभ्यः पातालमधिजग्निवान् ॥ यज्ञैर्विरहिता देवा दुःख
मा पुरहर्निशं ॥ ततस्ते शरणं जग्मुर्देवदेवस्य विष्णवे ॥ वराहरूपमास्थाय गं
गाद्वारं हरिर्ययौ ॥ तेन हरिणा संविश्य पातालं प्रतिमाध्वनः ॥ ९ ॥ हिरण्या
क्षं रिपुं हत्वा यज्ञानादाय देवराट् ॥ गंगाद्वारं समागत्य स स्नातो तेनैव वा

२

रणा ॥ जावत्कोल्लासुरः प्राप्तो हिरण्याक्षस्य सालकः ॥ उभयोरभव
द्दद्दमर्जितोस्य परस्परं ॥ तावत्कोल्लासुरं हंतुं नीलांबालचरिता ययौ ॥ नीलां
बोवाच ॥ मुंचैनं त्वं महाविक्रो मम भागाय मादितः ॥ अहमेनं हनिष्यामि भ
न्यस्य तु संगरं ॥ अयं कोल्लासुरो दैत्यो बहुवर्षाणि तिष्ठति ॥ हंति यात्रा
र्थिनां लोकानां यात्रास्य भयं जनाः ॥ प्रार्थिता हं वधायास्य गोतमेन म
हर्षिणा ॥ अतस्त्वं मुंच दैत्यं मा हं हन्मि महासुरं ॥ हिरण्याक्षं रिपुंह
तो भवान् श्रांतोसि मे मतिः ॥ समुक्तो देवदेवेन कोल्लो नीलामथाययौ ॥
अभूद्दद्दमस्त्वद्दोरं देव्याः कोल्लस्य चोभयोः ॥ शिलाभिर्मुष्टिभिश्चैव
व पादाघातैः परस्परं ॥ मुखमारत्य वेगेन हंतुं देवीपुरंगतः ॥ तावद्घल्लेनपा
र्वत्याहदि विद्धः पपात ह ॥ गोतम्याश्चीरसंस्पर्शात्स्वोत्तस्थं शांतापदुर्मतिः ॥

ना

अ॥ स्तोषीत्पार्वती गंगां देवदेवं जनार्दनं । स्तुवं तं तं समालोक्य पार्वती मुदिताभवत् ॥
पार्वत्युवाच ॥ वरं ब्रूहि वरं ब्रूहि कोल्लासुर महामते ॥ इसितं ते प्रदास्यामि यद्यपि स्व
स्यासुदुर्लभं ॥ कोल्लासुर उ० ॥ लोकानां सुषकारार्थं मन्नाम्नातिष्ट भूतले ॥
दर्शनं ये करिष्यंति तव मातर्नरोत्तमाः ॥ तेषां पुत्रांश्च पौत्रांश्च देहि लक्ष्मीं च शा
श्वतीं ॥ तथेत्युक्त्वा भद्रकाली तत्रैवांतरधीयत ॥ ततः प्रभृति तत्तीर्थं वारा
हं प्रथितं भुवि ॥ यस्य स्मरणमात्रेण मुक्तिरेव न संशयः ॥ ततः प्रभृति त
त्रास्ते कोल्ला नाम्नी मधारिणी ॥ ततः प्रभृति गंगापि पावनी संबभूव ह ॥
ततः सर्वे पि मुनयो नैमिषारण्यवासिनः ॥ गौतम्यास्तीरयोरेय स्वाश्रमां
श्च पृथक् पृथक् ॥ दृष्ट्वा तपांसि विदधुः स्व स्व नाम्ना महीपते ॥ लिंगानि
स्थापयामासुश्चैकुस्ती धन्यैनेक्रशाः ॥ गंगां तथाविधां दृष्ट्वा गौतमो पि महामुनिः ॥

३२

हरतदस्यत्वमापन्नः संतोषं परमं ययौ ॥ इति श्री ग्रं० चतुर्दशोध्यायः ॥१४॥ छ ॥ छ ॥
॥ नंद उवाच ॥ हरतेन्नक्षद्वयेतीतिमो धातारि शंबूरति ॥ कूर्मेश्चैव वराहेच सिंहस्थे
च बृहस्पतौ ॥ ब्रह्माद्रेः शिखरे गंगा पूर्वसागरमाययौ ॥ अतः सर्वेषु कालेषु सिंह
स्थो त्र विशिष्यते ॥ अतः सर्वाणि तीर्थानि सर्वे देवाः सवासवः ॥ उत्पत्तिस्थानं
मासाद्य वर्षंति इति सिंहगे ॥ अतस्सर्वेषु कालेषु सिंहस्थः परपुण्यदः ॥ पुरा सर्वा
णि तीर्थानि जनानां पापसंभवात् ॥ मलिनत्वं च संप्राप्य शंबूरं शरणं ययुः ॥
तीर्थान्यूचुः ॥ वयं तदाश्रयाः शंभो जनानां पावनाय च ॥ त्रैलोक्ये व्याप्तिः पाम
पावयामो जगत्त्रयं ॥ जनानां क्षुद्रपापाग्नि नाशयामो निरंतरं ॥ महापातक
नाशाय शक्तिर्नो नास्ति शंबूर ॥ महापातकसंसर्गान् मलिना निवयं प्रभो ॥
इति तीर्थवचः श्रुत्वा शंबूरो वाक्यमब्रवीत् ॥ गोदावरी समायां तु सिंहस्थे च बृह
[illegible]ङ्कर उ० ॥१॥

प्य

45

कुरुक्षेत्रं मिंद्र तीर्थं तथैव ४ विमलं निर्मलं चैव नाग तीर्थं तथैव च

स्पतो॥ वर्षमात्रं च तिष्ठंतु मया च हरिणा सह॥ महापातकनाशाय तत्र स्नानान्न
संशयः॥ इत्येकादशोत्तराणि तीर्थान्यन्यानि गौतमी॥ महापातकनाशाय ययौ
ब्रह्मादिपूजितः॥ उपतिष्ठाननमासाद्य गौतम्यास्त्र्यंबकांतिके॥ वर्षमात्रं स्वयं त
स्थौ सर्वैर्देवगणैः सह॥ वाराणसी समायाता तथैव मणिकर्णिका॥ पुष्करं च तथैव च
पुष्करादानि तीर्थानि गंगाद्याः सरितास्तथा॥ पुण्यक्षेत्राणि सर्वाणि पुण्यारण्या
नि यानि च॥ अयोध्या मथुरा माया काशी कांती अवंतिका॥ पुरी द्वारावती चैव
संप्रययुर्गौतमीं प्रति॥ नवैकोत्तरशतं कुंडक्षेत्रं व्याप्यावस्थितानि च॥ विश्वेश्वरा
दिलिंगानि तत्र तस्थुः शिवालयाः॥ वर्षमात्रमिति क्रम्य सिंहस्थे च बृहस्पतौ॥
सर्वपापविनिर्मुक्ताः स्वस्थानं गंतुमुद्यताः॥ उत्सुकानि समालोक्य शिवं गं
तुं स्वमाश्रमं॥ तथेत्युक्त्वा ययुः सर्वे यथास्थानानि शंकर॥ नंद्युवाच॥ सर्व

(८१)

जप४

दा गौतमी पुण्या सिंहस्थे तु विशेषतः ॥२ तस्मात्सर्वप्रयत्नेन कर्त्तव्यं सिंहस्थे स्नानमुत्तमं ॥ ये शृण्वंति नरा राजन्द्रते यांति परमां गतिं ॥ इति श्रीपद्म० त्र्यंबकक्षेत्रम० पंचदशोऽध्या० ॥१५॥ नंदिरुवाच ॥ बिल्वकेशस्य माहात्म्यं बिल्वतीर्थसमीपतः ॥ शृणु सावहितो राजन्कथयामि समासतः ॥ कदाचित्त्र्यंबको देवो निकुंजे रहसि स्थितः ॥ पार्वत्या क्रीडया युक्तो नीलाद्रेरुत्तरे तटे ॥ ललाटस्वेदजं वारि तर्जन्यादाय पार्वती ॥ बिल्वमध्ये विनिक्षेप तस्माद्बिल्वो बभूव ह ॥ तासर्वं विजया वेद पश्यंती दूरतः स्थिता ॥ पुनः कदाचित्तं देशं पार्वती लीलया ययौ तत्रापश्यन्महावृक्षं पुष्पितं फलितं तथा ॥ तं दृष्ट्वा विस्मयाविष्टा पार्वती विजयां जगौ ॥ केनायं रोपितो वृक्षो ममातीव प्रियंकरः ॥ विजयोवाच ॥ तव देहसमुद्भूतं स्वयं न ज्ञायते कथं ॥ नामास्य वद रूपे शीघ्रं तव पुत्रो न संशयः ॥

अथैवं वदस्य वृद्ध तां तं स्वेदाज्जनमेव च ॥ विजयावचनं श्रुत्वा पार्वती हर्षिता भव
तू ॥ पार्वत्युवाच ॥ बिल्वे समुत्थितायस्मा बिल्वनाम्ना प्रतिष्ठित ॥ आहूय त्र्यंबकं
तत्र सोऽपि तं वीक्ष्य विस्मितः ॥ यथा स्कंदः सुतोऽस्माकं यथा चैव गणेश्वरः ॥ तथा त्वं
मम पुत्रोऽसि बिल्व जीव चिरं सुत ॥ तव पत्रैश्च ये पूजां करिष्यंति मानवाः ॥
ते मे मान्याश्च धन्याश्च पूज्याश्चैव न संशयः ॥ बिल्वतीर्थमिदं पुण्यं ब्रह्मघ्ना
दि विशुद्धरं तु ॥ पार्वत्युवाच ॥ भवान् बिल्वेश्वरो भूत्वा बिल्वतीर्थे स्थितिं कुरु ॥
तथेत्युक्त्वा महादेवः पार्वत्या सह जग्मिवान् ॥ नंद्युवाच ॥ तदादि बिल्वतीर्थं
तत्पावनं भुवि विश्रुतं ॥ बिल्वतीर्थे नरः स्नात्वा बिल्वकेशं प्रणम्य च ॥ सर्वपा
पविनिर्मुक्तो याति सिंधोः स्वरूपतां ॥ गंगाद्वारे कुशावर्ते बिल्वके नील संग
मे ॥ स्नात्वा वै पापखल्ले तीर्थे पुनर्जन्म न विद्यते ॥ पंच तीर्थानि पुण्यानि
नि मुक्तिदानि न संशयाः ॥ पंच तीर्थे नरश्रेष्ठ मयाते कथितानघ ॥

यस्यास्मरणमात्रेण पापराशिर्विलीयते ॥ यानिकानिचपापानिब्रह्महत्यास
मानिच ॥ तानि तानि विनश्यंति पंचतीर्थ्यवलोकनात् ॥ पंचतीर्थे नरः स्नात्वा
गर्भे नैव व्रजेत्पुनः ॥ अष्टतीर्थं प्रवक्ष्यामि त्र्यंबकस्य महात्मनः ॥ कुशाव
र्ते नरः स्नात्वा ह्यष्टतीर्थं समारभेत् ॥ बल्लालतीर्थमासाद्य तत्र स्नानं स
मारभेत् ॥ तत्र श्राद्धं प्रकुर्वीत संतर्प्य पितृदेवताः ॥ बल्लालेशं गणेशंच त
त्र संपूजयेत ततः ॥ ब्राह्मणान्भोजयेत्तत्र गणेशः प्रियतामिति ॥ तत्र स्ना
नंच दानंच महाविघ्ननिवारणं ॥ २१ ॥ तत्राख्यानं पुरावृत्तं शृणु श्वेत महीप
ते ॥ गालवस्य सुतो ज्येष्ठः करटो नाम विश्रुतः ॥ कुरूपो मंदबुद्धिश्च भ्रा
तृभिः स्वतिरस्कृतः ॥ लज्जितः सोतिदुःखेन त्र्यंबकेश्वरं पर्यायौ ॥ गौतमो
पि कृपाविष्टः करटं तं शिष्यं चकार ह ॥ स्वयमाराधितं मंत्रं त्र्यंबकेश्वरं सर्व
कामदं ॥ बल्लाळेति स्फुटं बीजं गणानामधिपस्य च ॥ करटाय ददौ तस्मै

२३

हरपयापरयामुनिः॥ गौतमस्य प्रसादेन मंत्रराज्यप्रसादतः॥ अल्पेनैव चका-
लेन प्रत्यक्षोभूद् गणाधिपः॥ गणेश उ०॥ वरं वरस्य भद्रं ते यत्ते मनसि वर्त्तते॥
कूरट उवा०॥ सर्वविद्या प्रयच्छ स्वभुक्ति मुक्ती च देहि मे॥ तथेत्युक्त्वा गणा-
ध्यक्षः पुनर्वचनमब्रवीत्॥ भो भो गौतम विप्रेंद्र किं ते मीष्टं ददाम्यहं॥
गौतम उ०॥ प्रसन्नोसि गणाध्यक्षः स्तर्हि त्वं मम शासनात्॥ भक्तानां ए-
रयन्कामानत्र तिष्ठ जगत्प्रभो॥ ओमित्युक्त्वा गणाध्यक्षस्तत्रैवां-
तरधीयत॥ बल्लालेति तदारभ्य तीर्थख्यानं बभूव ह॥ बल्लालेश्वर इ-
त्याख्यां गणेशोपि जगाम ह॥ ततो वाराणसीं गच्छद्यत्र विश्वेश्वरः शिवः॥
स्तु मूर्तिमयी देवी त्रिशूलस्थो जगत्प्रभोः॥ वाराणस्यां वियोगेन
कुंभजन्माति दुःखितः॥ प्रेरितो देवकार्यार्थं दक्षिणाशां ययौ मुनिः॥
दक्षेत्रं समासाद्य ध्यायन्वाराणसीं तदा॥ विश्वेश्वरं च सततं ततापरे-

मंत्तपः॥ अत्यल्पेनैव च कालेन परितुष्टः सदाशिवः॥ वाराणस्यभवत्तस्य प्रत्य
क्षानंदप सत्तमः॥ वाराणस्यवाच॥ वरं वरय भद्रं ते मनसि वर्त्तते॥ अगस्त्य उं ॥ यत्तेऽ
इहैव तिष्ठ मातस्त्वं मम प्रीतिविवर्द्धिनी॥ वाराणसीत थेत्युक्ता तत्रैवांतरधीयत॥
तत्र स्नात्वा शिवं नत्वा संतर्प्य पितृदेवताः॥ श्राद्धं तत्र प्रकुर्वीत व्यं पितॄणां मुक्तिहे
तवे॥ तत्र स्नानं च दानं च मरणं चापि दुर्लभं॥ तत्र भुक्तिश्च मुक्तिश्च वसां भुनो
स्तु पितापुरा॥ इति श्रीपद्म० त्र्यंबकक्षेत्रमा० षोडशोऽध्यायः॥ १६॥ छ॥ छ॥
॥ नंदउवाच॥ वाराणस्याः समीपे तु वर्त्तते मणिकर्णिका॥ अगस्त्यार्थं समायाता
त्र्यंबके प्रीतिहेतवे॥ त्र्यंबकक्षेत्रमासाद्य तस्थौ लोकहिताय च॥ तस्यां स्नानं च
दानं च पितॄणां तर्पणं तथा॥ तत्सर्वं नृप सार्दूल तच्चैनं सायोपकल्पयेत्॥ तत्रा
ख्यानं पुरावृत्तं शृणुष्व तं महीपते॥ पुरा चचारो भवद्व्याधः सुमंतुरिति विश्रु
तः॥ नित्यं समृगयासक्तः पापशीलोऽतिनिष्ठुरः॥ सकदाचिन्मृगं हत्वा मांस

माहाय सत्तरः॥ मांसप्रक्षालनार्थाय ययो समपि कूर्मिकां॥ तत्र प्रक्षा

ल्य मांसं वै स्नानं घर्मातुरः कुरोतु॥ तस्यामेव निशायां च स भुजंगेन

भक्षितः॥ तेन पुण्य प्रभावेन मृतः स्वर्गपुरीं ययौ॥ यत्र कामदुघा गावो

यत्र पापसद्रुमाः॥ यत्र स्वर्णमयी भूमिर्यत्र कल्पमहीरुहः॥ तं देशं स

समासाद्य देववद्विविमोदते॥ इति ते कथितं सर्वं माहात्म्यं पापनाश

नं॥ यः शरपो तिनरो भक्त्या सोपि भक्त्या पापैः प्रमुच्यते॥ ततो गंगा

लयं गच्छ द्रष्टुं तीर्थं रतोन सः॥ गंगाया आलयं यस्माद्विहितं गौतमर्षि

णा॥ गंगालयमिति ख्यातं महापापविशुद्धिदं॥ साक्षाद्भगवती गं

गा महापापविनाशनी॥ गंगाद्वाराद्विहाया तां कुशावर्त्तमतःपरं॥ गंगाद्वा

रं यथा तीर्थं तथा गंगालयं विदुः॥ तत्र स्नानस्य दानस्य पुण्यसंख्यान

॥३६॥

विद्यते॥ तत्रश्राद्धं प्रकर्तव्यं पितॄणां मुक्तिहेतवे। अत्रयेतर्पिताः पुत्रैर्न तेयां
तियमालयं॥ गंगाल्लयस्यमाहात्म्यं पठितं पापनाशनं॥ रामलक्ष्मणयोस्तीर्थं
ततोगच्छेद्यतव्रतः॥ कृत्वावर्त्तं समागत्य रामचंद्रः सलक्ष्मणः॥ तत्रतीर्थ
विधिं कृत्वा गंगाद्वारे समाययौ॥ साक्षाद्भगवती गंगामार्गे प्रत्यक्षतां य
यौ॥ स्त्रीरूपधारिणी देवी रामपादौननाम सा॥ राम मां त्वं न जानासि
अहं त्वत्पादसंभवा॥ त्रिपथगाहं वराहेच कस्मै चित्कार्यहेतवे॥ वराहो मा
मिदं प्राह तच्छृणु घनरोचाम॥ तृतीय अवराहोहं राघवः सत्तमस्मृतः॥
नरवींपरयोः श्राद्धश्चाहं दर्शनं चावयोः क्वचित्॥ अतस्त्वं गच्छ राम
स्यदर्शनार्थं हरप्रिये॥ उत्पाद्यघास्मि तेनाहं तवसान्निध्यमागता॥

अत्र तीर्थविधिं ह्रत्वा पश्चाद्देवपुरो व्रजे ॥ रामलक्ष्मणयोर्नाम तीर्थस्यास्य
नि विद्यति ॥ नंद्युवाच ॥ इत्युक्त्वा राघवं नत्वा जलरूपा बभूव हा ॥ रामोपि तत्र
था चक्रे यथोक्तं गंगायां न च ॥ रामलक्ष्मणयोस्तीर्थं गंगाद्वारसमो विदुः ॥
तत्र श्राद्धं प्रकर्तव्यं पितॄणां तृप्तिहेतवे ॥ इति ते कथितं जौरानू रामल
क्ष्मण तीर्थजं ॥ रामतीर्थे विधिं ह्रत्वा शाल्मितीर्थं ततो व्रजे ॥ शाल्मो
नाम महाराष्ट्र स्तान्मूले गौतमो मुनिः ॥ अष्टोत्तर शतं नित्यं शिवलिंगा
नि पूजयेत ध्यायन्सदा शिवं देवं जपन्पंचाक्षरी मनुं ॥ निराहारो य
तात्मा च तताप परमं तपः ॥ गौतमस्य तपस्तुष्टस्य पुनः प्रादुरभूच्छिवः ॥
शंकरस्य प्रसादेत्र संप्राप्तो गौतमर्षिणा ॥ शाल्मीनो सर्वदोषाणि राम

या त्रिपुरारिणा ॥ अत्र यं सलिलं सर्वं गमिष्यति महामुने ॥ तत्र तत्र
भविष्यंति शालयो नात्र संशयः ॥ ३ ॥ स्वादिवरदानं च शंकरो पाद्य
तं मुने ॥ सिद्धिक्षेत्रमिदं पुण्यं कथितं पापनाशनं ॥ तत्र तीर्थविधिः
कार्यो दानं देयं स्वशक्तितः ॥ सर्वान्कामानवाप्नोति नात्र कार्या विचार
णा ॥ शालितीर्थस्य माहात्म्यं कथितं पापनाशनं ॥ तत्र तीर्थविधिं
कृत्वा शक्रकूपं ततो व्रजेत् ॥ शक्रेण निर्मितो यस्माच्छक्रकूपस्ततः
स्मृतः ॥ हत्वा वृत्रासुरं शक्रो ब्रह्महत्यामवाप्तवान् ॥ स तया धर्षितो
नित्यं सततं पृष्ठलग्नया ॥ पुष्करादीनि तीर्थानि सर्वाण्यामेति शुक्रम
न तथापि तया मुक्तो मानसं सरसाविशत् ॥ तत्र सूक्ष्मवपुर्दृ

त्वा कमलांतर्गतस्थितः॥ ब्रह्महत्या सरस्तीरे प्रतिक्षंती शतक्रतुं॥ निरीक्ष्य देवताः स्वर्गे बृहस्पतिमथाब्रुवन्॥ अस्माकं स्वामिनं देहि नः शक्तास्म दिवौकसां॥ परस्परविरोधेन वयं दुःखं भजेमहि॥ इति तद्वचनं श्रुत्वा बृहस्पतिरुदारधीः॥ ब्रह्मणो कथयामास सर्वं वृत्तांतमादितः॥ शक्रस्य वचनं श्रुत्वा विधाता तीव्र दुःखितः॥ गुरवे कथयामास शक्रशुद्धिविधिं विधिः॥ गुरो त्वमिंद्रमादाय त्र्यंबकस्य व्रज सत्वरः॥ तत्रास्य स्नानदानाभ्यां ब्रह्महत्या गमिष्यसि ते॥ नंदुरुवाच॥ बृहस्पतिर्नमस्कृत्य ब्रह्मणां खिन्नमानसं॥ इंद्रमादाय वेगेन त्र्यंबकं क्षेत्रमाययौ॥ इंद्रस्त्र्यंबकमास्थाय ततापपरमं तपः॥ अल्पेनैव च कालेन प्रसन्नोऽभून्महेश्वरः॥ शुद्धिं स प्रार्थयामास देवदेवान्महेश्वरात्॥ तथेत्युक्त्वा महादेवो ह्य

॥३८॥

तद्ध्यानगते सति॥ आनीय प्रणिपातेन गौतमं च बृहस्पतिः॥ उवाच वचनं शक्रः प्रसादः क्रियतामिति॥ तथेति गौतमेनोक्तो शक्रः स्वर्गपुरीं ययौ॥ तद्दिनारभ्य लोकेस्मिन्निंद्रतीर्थमिदं स्मृतं॥ इंद्रेश्वरो नाम शिवस्तस्य तीरे प्रतिष्ठितः॥ तत्र तीर्थविधिं कुर्याद्विशेषेण नराधीप॥ तस्य शक्रः ९ प्रसन्नस्यात्सर्वान्कामान्प्रयच्छति॥ वृत्रस्य दयिता साध्वी चंद्रिका नाम विश्रुता॥ महिषो नाम तद्भ्राता रसातलमगात्पुरा॥ स नारदमुखाच्छ्रुत्वा वृत्रासुरनिपातनं॥ भगिन्या सह यानेन च शक्रं वध्याय च॥ तस्या पीडितं श्रुत्वा शक्रं तपसि संस्थितं॥ महामहिषरूपेण शक्रं हन्मीति निश्चितः॥ त्र्यंबकक्षेत्रमासाद्य शक्रकूपसमीपतः॥ नापश्यत्तत्र देवेशं पुनः स कुपितोऽभवत्॥ विषाणाभ्यां खु

रे श्चैव सा कूपं बभंजहा॥ विभज्य सा कूपेतं दैत्यः पाताल माविशत्॥
इंद्रतीर्थस्य माहात्म्यं कथितं तव भूपते॥ तत्र तीर्थविधिं कृत्वा कांचनं तीर्थ
मावृजेत्॥ यत्र स्नात्वा नरो भक्त्या कांचनेशं प्रणम्य च॥ स्वर्गलोकं स
मासाद्य कांचनांगो भिजायते॥ कदाचिन्नृपतिः पांडुर्ऋषिभिः सहस्व
र्गतः॥ कुष्टीनां कुनखीनां च स्वर्गलोका निवारयौ॥ दृष्ट्वा स दुःखितो
भूत्वा व्यासायैतन्यवेदयत्॥ स व्यास वचनाद्राजा कांचनं तीर्थमाय
यौ॥ तत्र स्नात्वा च यक्षांश्च कांचनांगो बभूव ह॥ तत्र तीर्थविधिं द
त्वा॥ कुशावर्तं समापन्नं॥ इति ते कथितं राजन्न् एतत्तीर्थविधानकं॥
यः श्रृणोति नरो भक्त्या सोपि पापैः प्रमुच्यते॥ सर्वान्कामानवाप्नोति

च्यांते स्वर्गपुरीं व्रजेत्॥ ॥इति श्रीत्र्यंबकक्षेत्र॰ सप्तदशोध्यायः॥१७॥
नंद्युवाच॥ तीर्थयात्राविधिं वक्ष्ये त्र्यंबकस्य जगत्प्रभो॥ यां दृष्ट्वा मुच्यते पा
पात्कोटिजन्मसमुद्भवात्॥ यस्य जन्मसहस्रैस्तु पुण्यं भवति संचितं॥
तस्यैव त्र्यंबकं गंतुं बुद्धिर्भवति षण्मुख॥ त्र्यंबकं प्रतियास्यामि इदं भाग्यं त्वहो भा
ग्यमादितः॥ ये वदंति नरा राजंस्तेषां पुण्यफलं शृणु॥ अश्वमेधसह
स्राणि अश्वमेधशतानि च॥ सुरलोके सुखं भुक्त्वा पश्चाद्यांति महीत
ले॥ सद्वंशे जन्म संप्राप्य पश्चाद्यांति महीतले॥ त्र्यंबकक्षेत्रमायांति
ततो मुक्तिमुपैति च॥ त्र्यंबकं गंतुकामस्य यमो मुंचति रौरवं जानू॥ ना
नानरकसंघेषु पतितानपि कोटिशः॥ गृहाच्छिः सम्यक् कामेन त्र्यंबकं
गंतुं चेतसा॥ कार्यं पितृन्समुच्चार्य श्राद्धं पिंडविवर्जितं॥ कर्तव्यं तत्प

शार्द्दूल ततोद्रव्यं समर्पणं ॥ ब्राह्मणो भोजयित्वा तु इमं मंत्रमुदीरयेत् ॥ अद्य
मल्लाइ दंद्रव्यं पात्रवस्त्रादिसंयुतं ॥ अनेन मम भावेन त्र्यंबकः प्रियतामि
ति ॥ इमं मंत्रं समुच्चार्य त्र्यंबकं प्रणम्य च ॥ वह्निं गां कांचनं स्पृष्ट्वा प्रयाणं
तु समाचरेत् ॥ पद्भ्यां तु व्रजतः पुंसः पदं पुण्यं प्रजायते ॥ याने न व्रजतः
पुंसो द्वौ भागौ संप्रकीर्तितौ ॥ उपानद्गूढपादस्य भागत्रयमुदाहृतं ॥ मा
र्गे कस्यापि न ग्राह्यं तृणकाष्ठादिकं च यत् ॥ निराहारप्रायो गच्छेत् तस्य पुण्य
मनंतकं ॥ फलाहारप्रायो गच्छेत् शाकाहारप्रायो पुनः ॥ तेषामपि त्वपश्रे
ष्ठ पुण्यसंख्या न विद्यते ॥ हविष्यान्नं तु भोक्तव्यं भूमौ शयनमाचरे
त् ॥ ब्रह्मचर्यं दयाश्चैव सर्वत्र परिकीर्तिता ॥ मध्याह्ने तु समुत्तीर्य स्ना
नं संध्यां समाचरेत् ॥ मध्याह्निकीं विधिं यत्नैः सायं ततः स्मृतः ॥ परेद्युः

तत्र २

॥४०॥

प्रातरुत्थाय तत्रैव स्नानमाचरेत्॥ एवं संध्यात्रयं कार्यमेकत्र पृथिवीपते॥ नित्यश्राद्धं प्रकर्त्तव्यं स्वशक्त्या द्विजभोजनं॥ एवं मार्गे विधिः कार्यस्तीर्थयात्रार्थिना त्वया॥ तरुणानां च शक्तानां नैते धर्माः प्रकीर्त्तिताः॥ बालवृद्धातुरस्त्रीणां यथाशक्त्यानुवर्त्तनं॥ मौनी जितेंद्रियो गच्छेत् सर्वभूतहितेरतः॥ त्र्यंबकस्य कथां श्रुत्वा पठन्स्तोत्राणि तस्य हि॥ एवं मार्गे विधिं कुर्वन्योगच्छेत् त्र्यंबकं प्रति॥ पदे पदेऽश्वमेधस्य फलं तस्य प्रकीर्त्तितं॥ स्थित्वा सारसमास्यां क्व पंच लिंगानि तस्य हि॥ प्रणमेद्दंडवद्भूमौ स्तोत्रमेतदुदीरयेत्॥ लिंगानि पंच तव शंकर दुर्ल्लभानि ब्रह्मेंद्रविष्णुवरुणैकनिरीश्वराणां॥ विस्फार्य लोचनयुगं परतः समंतात्पश्यामि जंतुररिवल्लं तव यत्प्रभावे॥ किं किं हरं तु सुहृति भिर्मम पर्वजैर्वा

पुण्यं भविष्यति न शंकरवेषि लोके ॥ येनातुराभवभुजंगवेष्टितोऽहं त्वं संचलिं
गानि च यर्हि विलोकयामि ॥ धन्यो मदीयजनको जननी च धन्या धन्यं कु
लं च सकलं मम जन्म धन्यं ॥ यन्नाटकेर्गिनरकार्णवजायमानो प्यालो
कयामि भवतः शिखराणि पंच ॥ इति ब्रह्मगिरौ स्तोत्रं पठित्वा प्रणमेत्पु
नः ॥ हनुमंतं नमस्कृत्य पूर्वद्वारेण मानवः ॥ ज्योतिर्मयस्य लिंगस्य प्रसा
दं प्रणमेत्ततः ॥ तत्केवलं हि निलयं गिरिजाप्रियस्य यत्र स्वयं त्रि
भुवनैकपति स्वशान्त्या ॥ श्री त्र्यंबकः सकलकामनिदानभूतस्तद्भू लि
दर्शनमनेन पुरा विधेयं ॥ त्र्यंबकाय नमस्कृत्वा तस्य स्तोत्रमिदं पठेत् ॥
शंभो न वेद्मि किमु यस्य गवाननं तः कैलासवासमपहाय भुवं प्रया
ति ॥ विश्वं विलोक्य भवसागरमज्जमानं त्रातुं महेश जगदीश नमो

॥४७॥

स्तु तुभ्यं ॥ सह्याद्रिणा किमु दरतं न जाने यन्मूर्ध्नि विश्वजनकोपि सु
खेन सेते ॥ कैलासवासमपहाय जगत्प्रियाय ॥ त्र्यंबकाय नमदस्य कु
शावर्तितो प्रजेतु ॥ कुशावर्तं नमस्यस्य स्तोत्र मेतमुदीययेतु ॥ मातर्न
मामि जगतीं भवतीं प्रताप संहारिणी त्रिपुरशत्रु जटाप्रयातां ॥ गो
दावरी सकल सर्व जतारिणीं त्वां ब्रह्माद्रि मस्तकभुवां मुनिवर्य सेव्यां ॥
मातर्न वेह्मि सुंदरतं मम सर्वजानां किं वा ममैव बहुव कोटिषु संचितं स्या
त् ॥ येन त्वदीय सलिलं भवबंध हारि पश्यामि चर्मनयनेषु परपीडयं ॥
संसार घोर गहने पतितोस्मि नित्यं कामादि लस्करशतैः परिवेष्टितो
हं ॥ त्वं रक्ष मामिति प्रलपन्प्रधावन् त्वामद्य संभु दयिते शरणागतोस्मि ॥

इतिं गंगास्तुतिं दत्वा दंडवत्प्रणमेत्पुनः ॥ ताम्रपात्रे समादाय नानाफलसम
न्वितं ॥ गंधपुष्पान्वितं तत्र स्तोत्रमंत्रानेतानुदीरयेत् ॥ आद्ये ब्रह्मगिरेमूर्ध्नि ती
र्थत्र्यंबकसंस्थितं ॥ अघौघवारहं पुण्यं कुशावर्त्तपतः परं ॥ नमो गंगे महागं
गे महादेवस्य वल्लभे ॥ महतेत्वा महादेवि गोदावरि नमोस्तु ते ॥ ब्रह्माद्रि
शिखरोत्पन्ने त्र्यंबकविराजिते ॥ गौतमप्रार्थिते गंगे गोदावरि नमो
स्तु ते ॥ अर्घ्यं दत्वा गुरोरग्रे स्थानमधिगम्य जलं विशेत् ॥ मलस्नानं प्रकर्त्त
व्यं पुनः संस्कारमाचरेत् ॥ आत्मनः शुद्धिकामो वा पितॄणां मुक्तिहे
तवे ॥ एवं नंकारयिष्यामि तीरे हं तव गौतमी ॥ यानि कानि च पापानि
ब्रह्महत्या समानि च ॥ केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं ॥

॥४२॥

पितायस्य नयातीह स्वर्यं याति च गौतमी ॥ तदा तेन प्रकर्तव्यं मुंडनादि
तदाश्रया ॥ सिंहे वृत्ते प्रयातानां मुंडनं न विधीयते ॥ गंगायां भास्करक्षे
त्रे माता पित्रोर्मृते तथा ॥ आधाने सोमपाने च षट्सु क्षौरं विधीयते ॥ ४८ ॥
इति श्रीपद्मपुराणे त्र्यंबकक्षेत्र० अष्टादशोऽध्यायः ॥ १८ ॥ नंदउवा
च० ॥ दशपीलादिकं स्थली मंत्रस्नानं समाचरेत् ॥ गोभूतिलहिरण्या
ज्यं वासो धान्यं गुडानि च ॥ रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ॥ न्या
यार्जितस्य वित्तस्य गंगायामर्पितस्य च ॥ विप्राय वेदविदुषे पुण्यसं
ख्या न विद्यते ॥ रेवातीरे तपः कुर्यान्मरणं जाह्नवीतटे ॥ दानं दद्यात्कु
रुक्षेत्रे तत्रैयं गौतमीतटे ॥ जलशायी जगन्नाथो पूजनीयः प्रयत्न
तः ॥ ततः कुशेश्वरं संपूज्य जयेश्वरं ततः परः ॥ वीय व्याघ्नि दिशो रख्या
तुन्टसिंहः स्वयमास्थितः ॥ नैर्ऋत्यां रामचंद्रश्च लक्ष्मणेन समन्वितः ॥

हा६

वायव्यामश्विनौ देवौ पूर्वस्यां पावकः स्वयं ॥ दक्षिणस्यां तु केदारः पश्चिमस्यां
कुशेश्वरः ॥ उत्तरे केशवौ देवौ जलशायी तु मध्यगः ॥ एतेषां तु पूजनं का
र्यं तर्पणं तु पृथक् पृथक् ॥९॥ इहार्थे कथयिष्यामि कथामेकां पुरातनीं ॥ क
दाचिद्गौतमो स्नातुं कुशावर्ते समनाययौ ॥१०॥ स राक्षसप्रेरितो भूतैः समंता
दुपस्थितो भवत् ॥ गौतम उ० ॥ श्रीरामलक्ष्मणकुशेश्वरनारसिंह श्रीकेशवा ॥४२॥
श्वितनयौ हुतभुक् नृसिंहाः ॥ केदारपो हि जलशायी समस्त प्रभो हि वा
यो प्रयाहि गगने भगवन्नमस्ते ॥ संभ्रमेण स्वस्व त्वाच्चा मुनिनाः समुद्धी
र ते ॥ तत्क्षणादेव भूतानि हत्वा दश दिवौकसः ॥ गौतम ब्रूहि भद्रं ते इत्युक्तु
स्तौ महामुनिं ॥ भूतानि भस्मसात्कृत्य न्हेलादशादिक्षु सुरोत्तमान् ॥ विलो
क्य गौतमो दृष्टो वाक्यमेतदुवाच ह ॥ भवंतो यदि मे तुष्टाः सदा युष्माभिः ह
लो. स्थेहि ॥ भवद्भिरत्र स्थातव्यं यावदाभूतसंप्लवं ॥ येथेमं भूतबाधामे.

वारितासुरसत्तमाः॥ तथैवयुष्मच्छक्तेनामत्रयात्रार्थिनोन्टपां॥ भूत
प्रेतपिशाचानांपीडावार्यनिरंतरंगतंतथैप्रतिस्नायंहंतधर्ानंस्तुरायमु
तद्दिनादत्रभूतानितेषांसत्क्रोधवीक्षणे॥ भस्मीभवंतिराजेंद्रनात्रका
र्यविचारणा॥ इतितान्ध्यजयित्वातुभूयंसीदक्षिणान्यसेतूं॥ त्रिवा
रंपच्चवारंवासप्तवारमथापिवा॥ एकादशाथवाकार्याकुर्यात्वत्प्रद
क्षिणाः॥ गंगाचसव्यतःदत्वानीत्वेसंप्रणमेत्ततः॥ दशाश्वमेधि
कंतीर्थंनत्वागच्छेत्ततःपरं॥ २०॥ कपोतेशंनमस्कृत्यतैस्त्वःसध्या
स्तथैवच॥ भुवनेशंसमागत्यनत्वासंपूजयेच्छिवं॥ अद्यलिंगमि
दंप्रोक्तंभुवनेश्वरसंज्ञिकं॥ अत्रार्थेकथयिष्यामिकथामेकांपु
रातनं॥ असीत्पुराकृतयुगेभुवनोनामभूपतिः॥ यज्वादानःपतिः

श्वरः सर्वधर्मपरायणः॥ स पुत्रार्थे तपस्तेपे स्वनाम्ना स्थाप्य शंकरं॥
तस्मिन्स्थाने स्थिते नाथे भार्या शुभलक्षणा॥ भुवना नाम वितापतिशुश्रूषणे रता॥ ततो दूरं स्थियन्त्या लज्जया परया सती॥ स्वनाम्ना पार्वती स्थाप्य तपस्तेपे पतिदारुणं॥ अल्पेनैव च कालेन पार्वतीपरमेश्वरौ॥ तयोः प्रत्यक्षतामेत्य ददतुश्च शतेसुतान्॥ ततः प्रभृति तल्लिंगं भुवनेश्वर संज्ञिकं॥ सापि देवी जगन्माता विख्याता भुवनेश्वरी॥ संपूज्य भुवनेशानमुत्तरद्वारं ततो व्रजेत्॥ त्र्यंबकात्स्थिमागत्य गच्छेत्सिद्धिविनायकं॥ संपूज्य विधिवद्देवं गणानामधिपं विभुं॥ पठनीयमिदं स्तोत्रं गणेशप्रीतये तदा॥ यो विघ्नवल्लिगहने विहंतुं कुरे कुठारः स ततेव भक्तिं॥२०॥ यः संस्थितः

ख्या २

॥४४॥

शी घ्रतरं श्रयां तु तस्मै नमः सिद्धिविनायकाय॥ यो ब्रह्मरूपेण जगत्करोति यो विष्णुरूपेण च पातु सर्वं॥ रुद्रस्वरूपेण जगत्करोति निहंति सर्वं तस्मै
नमः सिद्धिविनायकाय॥ यस्त्र्यंबकस्यालयतोपरस्यां दिशः स्थितः
सर्वसमृद्धिकर्ता॥ विद्याप्रदानाय भजज्जनानां तस्मै नमः सिद्धि
विनायकाय॥ ३२॥ स्तोत्रं दरं तं सिद्धिविनायकस्य धात्रा महेशेन मुरा
रिणा च॥ पठंति भक्त्या सततं त्रिकालं सिध्यंति कार्याणि हरंतानि
तेषां॥ ततस्त्र्यंबकं गत्वा पूजा तस्य समारभेत्॥ आगतो केन
मार्गेणापि वेदिकेनाथवा पुनः॥ चातुर्वर्णेन कर्तव्या त्र्यंबकस्य प्रपूजा
नं॥ परितो देवताः सर्वाः पूजनीयाः प्रयत्नतः॥ तीर्थोपवासः कर्त्त
व्यं स्ताद्दिने नृपसत्तम॥ अत्र तीर्थोपवासस्य पुण्यसंख्यानवि

मै २

घतोभ आसीत्कदाचिद्विराटाख्यो द्विजः पापसंभवः ॥ काष्ठं ग
हीत्वा विक्रेतुं त्र्यंबकपुरमागतः ॥ तद्दिनैव योगेन विक्रयो न भवन्न पा
सादं मौल्यै धसं जाते क्षुधया परिपीडितः ॥ कुशावर्त्तं समागत्य स्ना
त्वा पीत्वा च पतउ उरले गउपावासी स्थित स्तस्यां निशायां विजितेंद्रि
यः ॥ प्रातर्विक्रीय तत्काष्टं अल्पे मौल्ये तदुःखितः ॥ निर्जगाम स्वग्रा
मं सभार्यामेतदुवाचह ॥ अद्याभारर्म्यनया स्वामित्र्यंबकं प्रतिभा
मिभि ॥ विराटः कतिपे वर्षैर्देहन्यासमवापह ॥ दिव्यं विमानमा
रुढः कैलासप्रययोनतः ॥ इच्छं तीर्थेपिवासस्य गंगास्नानस्य चै
वहि ॥ महिमान्त्यप सादं दृष्ट्वा मया तेपरिकीर्तितः ॥ इति श्रीपद्मपु
राणे त्र्यंबकमाहात्म्ये एकोनविंशतिमोध्यायः ॥ १९ ॥ ७० ॥

॥ ४५ ॥

नी

विर　　　　नर

द्वितीयेन्हि प्रकर्त्तव्यं तीर्थश्राद्धं यथाविधि ॥ अर्घ्यमावाहनं चैव वह्न्यांगुष्ठनिवे
शनं ॥ तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ॥ तृतीये दिवसे कार्या पंचती
र्थी नराधिप ॥ चतुर्थे दिवसे स्नानं [illegible]तीर्थे प्रकीर्त्तिता ॥ क्षेत्रप्रदक्षिणा
कार्या पंचमे दिवसे नृप ॥ नवक्रोशात्मकं क्षेत्रं त्र्यंबकं मुनिभिः स्मृतं ॥ त्रिभिः
परिक्रमैः प्रोक्ता ब्रह्माद्रेस्तु प्रदक्षिणा ॥ षट्पंच प्रक्रमैरुक्ता महती सा
नृपोत्तम ॥ षट्पंचमहतीभिस्तु प्रोच्यतेति प्रदक्षिणा ॥ एवं सा विविधा
प्रोक्ता कोटियज्ञफलप्रदा ॥ महापातकनाशाय प्रायश्चित्तपरं हि सा ॥ य
स्य ब्राह्मणासंज्ञः कोटिजन्मसमुद्भवः ॥ प्रायश्चित्तपरं तस्य ब्रह्माद्रे
स्तु प्रदक्षिणा ॥ अनन्तकोट्यान्मनुष्याणां दुर्लभा सा कलौ युगे ॥ अतः
सा नृप [illegible]विशेषात्प्रोच्यते मया ॥ नवक्रोशात्मका प्रोक्ता त्र्यं

बकस्य प्रदक्षिणा ॥ महिमानं प्रवक्ष्यामि तस्याः शृणु महीपते ॥ ब्रह्महापि वि
मुच्येत अन्येषां तत्र का कथा ॥ अपुत्रः पुत्रमाप्नोति बद्धो मुच्येत बंधनात् ॥ १०
पिशाचब्रह्मरक्षोभ्यो मुच्यंते ते पि दुःखतः ॥ अक्षिरोगं कुक्षिरोगं
शूलं निचरं तत्रयं ॥ राजयक्ष्मादयो रोगा दरिद्रं सततं जन्मजं ॥ राज
चौराग्निशत्रूणां सिंहादीनामुपद्रवाः ॥ सर्वे ते विलयं यांति मोक्षं ॥ १४ ॥
परं मोक्षमाप्नुयात् ॥ धर्मे चार्थे च कामे च मोक्षे चैव नृसत्तम ॥ अ
नया सदृशोपायो नान्योस्तीति मतिर्मम ॥ विधिना विहिता सा तु को
टियज्ञफलं लभेत् ॥ तस्मात्तस्या विधिं वक्ष्ये शृणु श्वेत महीपते ॥
प्रातः स्नात्वा शुचिर्भूत्वा चिंतयेदात्मनो हितं ॥ ग्राममध्ये तरेत्तोय

त्वा तयोन छाद्यभूमिवां ।। परिधमस्त्रयोस गंतित्र कुर्याज्जपोत्तमः ।।
गृहीतशिरश्चोच्छायमृद्भिरभ्युद्धृतैर्जलैः ।। गंधलेपक्षयकरं सो
चं कुर्याद्यतंद्रितः ।। एका लिंगे गुदे तिस्रः उभयोर्मृद्वयं स्मृतं ।। पं
चापाने दशैकस्मिन्नुभयोः सप्तमृत्तिका ।। एवं शौचविधिं कृत्वा
गंडूषैः क्षालयेन्मुखं ।। दंतानां काष्ठसंयोगं दूति पुण्यपुराहतं ।। अत
पुण्येषु कालेषु न कुर्याद्दंतधावनं ।। कुशावर्त्तं समागत्य स्नानं कु
र्याद्यथाविधिः ।। उपास्य संध्याविधिवत् परिधाय च वाससी ।। आ
सनः शुद्धिकामो वा पीत्वा मुक्तिहेतवे ।। प्रदक्षिणां करिष्यामि
निर्विघ्नेन समाप्यतां ।। त्र्यंबकस्य प्रसादेन ब्राह्मणानां प्रसाद
तः ।। गौतम्याश्च प्रसादेन सिध्यतां मे प्रदक्षिणा ।। इति मंत्रं समु

शा २

आर्यसंकल्पं तु समाचरेत्॥ त्रिवारं पंचवारं वा सप्तवारमथापि वा॥
एकादशाथवा कुर्यात्कुंवर्त्तप्रदक्षिणाः॥ कुशावर्त्तं कुशेशादिदेव
ताः प्रणमेत्ततः॥ ब्रह्मादिं च नमस्कृत्य गंगाद्वारं वाच सव्यतः॥
त्र्यंबकान्नयमागत्य तस्य कुर्यात्प्रदक्षिणा॥ यथाशक्ति प्रकुर्वीत
त्र्यंबकस्य प्रदक्षिणा॥ त्र्यंबकेशं च नमस्कृत्य हनुमंतं प्रणम्य
च॥ मौनी जितेंद्रियो ध्यायन्त्र्यंबकेशं स्मरन्मुहुः॥ रुद्रजाप्याहि
वं कुर्वन्यटन्नामानि तस्य च॥ शनैः शनैर्व्रजेन्मार्गे यथाश्वासो
नि:सरेत्॥ फलशाकादिकं मार्गे न ग्राह्यं च्चैपसत्तम॥ पु
रीं च मत्त्रोत्सर्गं वामभागे व्रजेन्नरः॥ तत्र शौचविधिं कृ
त्वा पुनः स्नानं समाचरेत्॥ तिस्त्रः कोट्योर्द्धकोटीच ती-

॥४॥

र्थ्यं भुवनत्रये ॥ ब्रह्माद्यैः परितो मार्गे तानि सर्वाणि संति हि ॥ दरता
दौ सर्वतीर्थानि स्फुटान्यासन्द्विजोत्तमा ॥ प्राप्ते कलियुगे घोरे सर्वा
ण्यंतर्हितानि हि ॥ कानिचित्तेषु मुख्यानि गौतम प्रार्थितानि च ॥ ते
षां माहात्म्यमुद्दिष्टं त्वां वदामि यथामति ॥ प्रयागं राम तीर्थं च विम
लं निर्मलं तथा ॥ ततो वैतरणी गंगा गौतमाश्रम एव च ॥ शालि
तीर्थं सप्तमं चन्द्रसिंहं चाष्टमं तथा ॥ ततो गणेश्वरं तीर्थं नव तीर्था
न्यनुक्रमात् ॥ तेषामुत्पत्तिमाहात्म्यं कथ्यमानं मयानघ ॥ तच्छृ
णुष्वावहितो भक्त्या सर्वान्कामानवाप्स्यसि ॥ यत्र यागं पुरा च
क्रे स्रष्टैः सर्वविधिः स्वयं ॥ ततः प्रभृति तत्तीर्थं प्रयागाख्यं प्र

चक्ष्यते॥ तत्र स्नानं हि कर्त्तव्यं पीत्वा तर्पणं तथा॥ श्राद्धं चैव प्र
कर्त्तव्यं वटमूले यथाविधिः॥ अत्र ब्रह्मा तपस्तप्त्वा सर्वान्कामा
नवाप्तवान्॥ प्रयागतीर्थमाहात्म्यं कथितं तव सुव्रता॥ य श्रृणो
ति नरो भक्त्या सर्वान्कामानवाप्नुयात्॥४०॥ इति श्रीपद्मपुराणे
त्र्यंबकक्षेत्रमाहात्म्ये विंशतितमोऽध्यायः॥२०॥ नंद्युवाच॥ रामतीर्थे न ॥४०॥
रः स्नात्वा सर्वपापैः प्रमुच्यते॥ तत्र स्नानं च दानं च मुक्तिदं त्र संशयः॥ ना॥४
सीतायां नीयमानायां रावणेन दुरात्मना॥ रामः पंचवटीं हित्वा सा
नुजः काननं ययौ तत्र पंपासरो दृष्ट्वा प्रफुल्लजलजार्चितं॥ क्षणं
विश्रामम करोत्पयः पीत्वाच तत्तटे॥ एतस्मिन्नंतरे तत्र सुग्री

वौ वानरैः सह ॥ पंपासरः समागत्य राम पादौ ननाम सः ॥ राम सुग्रि
वयोः प्रीतिर्ववर्धे तत्र तिष्टतो ॥ तस्मिंश्चित्समये सर्वे विचारं च
क्रिरे हिते ॥ किं कार्यं क्व च गच्छामः सीताशुद्धिः कथं भवेत् ॥ प्रदर
वौ वहुरामानो राक्षसः पापचेतसः ॥ स्वप्नेपि दर्शनं तेषां महाश्च
सुकरं विदुः ॥ रावणोनयदानीतामद्य तां सीतां न दैनु हि ॥ अथवा सा
गरं तीर्त्वा लंकां गत्वा च मद्य गतौ ॥ सागरो बहु गंभीरो वहुयोजन
विस्ततः ॥ क्रोश मात्राभिताम स्यासो तु नाम्नाति मिंगिलाः ॥ ति
मिंमिलगिलोंप्य स्मितद्भिलो प्य स्मि राघवः ॥ एवं बहु विधा मस्या
वर्तन्ते मकरालये ॥ कुंभकर्णादिभिर्वरैर्लंका संरक्षणा निशं ॥

लोर

एवंवदन्सुयोद्दृशुदीर्घनिःश्वस्यराघवः॥उच्चैस्तत्रस्वनंदत्साहा
सीतेतिरुरोदह॥रामस्यरुदितंश्रुत्वातत्रागत्यांजनावदत्॥मा
रामरोदनंकार्षीःश्वःप्रयास्यतिजानकी॥ममगर्भसमुद्भूतोना
युपुत्रोमहाबलः॥हनूमानामविख्यातोअस्तिपंचदिनात्क्रम ॥
ममपुत्रेसमुत्पन्नेवायुवाचाशरीरिणी॥उत्पन्नमेकादशोरुद्रस्तेवु ॥५॥
पुत्रोमहाबलः॥एकेननिमिषार्धेनलंकादाहंकरिष्यति॥अने
नसदृशःकश्चिद्बलवान्नभविष्यति॥दत्त्वारामस्यसाहाय्यं
कीर्तिपारंगमिष्यति॥सशक्तःसकलंजेतुंत्रैलोक्यंसचराच
रं॥रावणस्यवराकस्यहननेतत्रकाकथा॥इत्यंजनावचःश्रु

त्वा रामस्य स्मितमायया ॥ मा राम विस्मयं कार्षीर्मद्वाक्ये जगतः
प्रभो ॥ मम स्तन्यं पिबेद्यस्तु तन्मुह्येत् भुवनत्रयं ॥ अधुनैव महाबाहो
कौतुकं दर्शयामि ते ॥ अंगुष्ठतर्जन्यग्राभ्यां न्यपीड्यस्तनचूचु
कं ॥ ततः पंचपयोधारा सुस्रुवुः पृथिवीतले ॥ नाभिर्ब्रह्मगिरे
र्जानुः प्रभिन्नः पंचधाभवत् ॥ हाहाकारो महानासीद्देवानां
तत्र पश्यतां ॥ एतस्मिन्नंतरे वाणी ब्रह्मादेः समजायत ॥ साधु
साधु महाभागे षट्लिंगानि ममाधुना ॥ विहितानि त्वया भद्रे
मम प्रीतिकराणि हि ॥ द्रवीणि पंचलिंगानि षड्मानि परा
णि च ॥ एकादश भविष्यंति लिंगानि मम सांप्रतं ॥ विल्वो

कुर्वंति ये भक्त्या तेषां मुक्तिर्न संशयः ॥ राम राम महाबाहो तपस्तप महामते ॥ अल्पेनैव च कालेन तव सिद्धिर्भविष्यति ॥ रामोपि तद्वचः श्रुत्वा प्रह्लादः स्वस्तिपितयो ॥ नित्यमाराधयामास शंकरं लोकशंकरं ॥ अल्पेनैव च कालेन परितुष्टः सदाशिवः ॥ उवाच वचनं प्रीत्या राममालिंग्य सत्वरं ॥ राम राम वरं ब्रूहि यत्ते मनसि वर्त्तते ॥ राम उवाच ॥ शंकरन्विजितः संग्रामे जानकी मम हस्तगा ॥ १ ॥ यथा भवेत्तथा देहि वरं वरविशारद ॥ शंकरोपि तथेत्युक्त्वा रामं पुनरुवाच ह ॥ एतद् त्वया स्थापितं लिंगं त्वन्नाम्ना ख्यातिमेष्यति ॥ महापापहरं नाम रामतीर्थं भविष्यति ॥ तत्र श्राद्धं प्रकर्त्तव्यं पितृ ॥ १५० ॥

णां तृप्तिहेतवे॥ मुमुक्षिणैव तत्सेव्यं यतो मुक्तिप्रदं स्मृतं॥ अत्र वासश्चिरं नैकः कर्त्तव्यः पापभीरुणा॥ अत्र यत्कल्पितं चित्ते तत्कोटिगुणितं भवेत्॥ इदं संन्यासिभिः सेव्यं यतस्तो संगवर्जिताः॥ इति श्रीपद्मपुराणे च्यवनक्षेत्रमाहात्म्ये एकविंशतिमोऽध्यायः॥२१॥ नंदुरुवाच॥ रामतीर्थे विधिं दत्त्वा विमलं निर्मलं व्रजेत्॥ तत्राख्यानं पुरावृत्तं शृणुश्वेत महीपते॥ कुबेरस्य सुतौ पूज्यौ गंधादौ रूपचारकैः॥ सावपास्य भयान्नीनो ब्रह्मा द्रेर्दक्षिणे तटे॥ नारदेनोपदिष्टौ तौ तत्तापे परमं तपः॥ निर्हा राशेय तामानो वायुभक्षौ जितेंद्रियौ॥ विमलौ विरजौ शांतौ सर्वभूतहिते रतौ॥ ध्यायंतौ शंकरं देवं पूजयंतौ सदाशिवं॥ स्तुवंतौ विविधैः स्तोत्रैर्द्

३१

ब्यवर्षसहस्रकं गतयोः सदाशिवस्तुष्टः प्रत्यक्षः समज्जायत॥ वरं व
रयतौ मात्रो यथेप्सितं तवावुभौ॥ विमलनिर्मलावूचतुः॥ वयं प्रभ्र
शिताज्ञा जाव पोनदुरात्मना॥ घोषितं तेन सर्वत्र तदपि शृणु शंकर॥
कुबेरं तस्य पुत्रौ वा वा यो गृहे स्थापयिष्यति॥ तमहं मारयिष्यामि
सत्यमेतं नात्र संशयः॥ तद्भिया त्रिषु लोकेषु नास्माकं विद्यते स्थ
लं॥ पितरं नैव जानावः क्व गतः क्व च वर्त्तते॥ अस्माकं पुष्पकेन्नी
तं॥ पिता वै ताडितो भृशं॥ इति दुःखाभिसंतप्तौ तौ मां शरणं
गतौ॥ त्वमेक जगतां नाथ स्त्वं पिता त्वं च कौ रक्षकः॥ रावणाद्भ
यं देहि यदि तुष्टोसि शंकर॥ शंकर उवाच॥ भवसि त्रातपस्त्वां
मयातस्या लंकार्पिता॥ यक्षणामधिपत्यश्च धनाध्यक्ष

व:६

॥५१॥

दृष्टो मया ॥ विमानानां शतं तस्मै मया दत्तं शशिप्रभं ॥ भवेतां वाधि
मल्लोके निष्टे ताम मम संन्निधौ ॥ यथा गणेशो मे पुत्रो यथा स्कंदः सुतो
मम ॥ यथा भवंतौ मे पुत्रौ ताभ्यां भ्यामप्यधिकौ मतौ ॥ भवद्योग्यं न
पश्यामि कैलासादपरं स्थलं ॥ भव स्थ्यांस्थापिते लिंगे भवन्नाम
भविष्यतः ॥ विमलं निर्मलं चैव तीर्थद्वयमिदं भुवि ॥ १२ ॥ भविष्य
ति महापुण्यं पवित्रं पापनाशनं ॥ तीर्थयोः स्नानमात्रेण मलहीनो
भवेन्नरः ॥ अतः क्षितितले राजन्विमलं निर्मलं स्मृतं ॥ आख्या
नं पुरावृत्तं शृणु विस्मयकारकं ॥ कश्चित्पल्ली पतिः पूर्वं व
न गुप्त इति स्मृतः ॥ सुरूपा नाम तद्भार्या तरुणी रूपशालि
नी ॥ तस्यामेकः सुतो जातो गुणवानपि विश्रुतः ॥ वत्रगुप्त

स्वकालेन मरणं प्राप्तवान्नृप ॥ सुरूपा तनयं तत्क्वापि केनचित्सह निर्गता ॥ कामाक्रांता पतिं हित्वा स्वयमेव निरगमत् ॥ पश्चाद्वर्षे छं
गच्छंती सा बभूव वरांगना ॥ गुणवानपि तत्पुत्रो वर्द्धमानो कृपाविष्टः
तः ॥ दुर्भिक्षमभवत्तत्र कस्मिंश्चित्काल पर्यके ॥ गुणवानपि तं
ग्रामं हित्वा ग्रामांतरं ययौ ॥ गुणवानपि कांताथं सुरूपा पितृप्रि
यार्थिनी ॥ उभौ स्त्रीपुरुषौ भूत्वा भुंजते सुखमुत्तमं ॥ कस्य ॥५२॥
द्विजवेश्मनि ॥ व्यतीयाय महान्कालस्तयोरेवं नृपोत्तम ॥ प्रा
तःकाले तयोर्देहौ कुष्ठिनौ दद्रुमिसंकुलौ ॥ विमले निर्मले स्वा
याद्दिव्यरूपौ बभूवतुः ॥ गृहस्वामी विवेकाख्यः कदाचित्तं ददर्श
चिद्द्विजमुख्यस्य सदनं गोकुलरक्षणं ॥ गृहे द्विकालं भुंजीने वसंतौ ॥ शोभये क्वि

ह॥ किमयं युवयोर्देहे पृष्टौ तेनोचतुस्तदा॥ ताऊचतुः॥ नित्यमेवा
वयोर्देहौ जायेते दुर्गसिसंकुलौ॥ अरण्ये निर्जले देशे तडा
गह्वयमस्ति हि॥ तत्र मज्जनमात्रेणा दिव्यदेहौ भवावहे॥ जा
यते च पुना रात्रौ एवं वर्षचतुष्टयं॥ न जानीमः कदा रोगा
न्मिच्यति हि दारुणः॥ इति तद्वचनं श्रुत्वा विवेकः सद्द्विजोत्त
मः॥ ताभ्यां सहैव तद्दृष्टं ययौ विमलनिर्मलौ॥ तं समक्षं
जले स्नात्वा दिव्यदेहौ बभूवतुः॥ विवेकेन गृहे नीत्वा पृथ
क्स्थाप्य निवेदितौ॥ प्रातःकाले तु संजाते तादृशौ वीक्ष्य वि
स्मितः॥ उत्पत्तिं च तयोर्दृष्ट्वा विवेकः पृष्टवांस्ततः॥

लेर

विचार्यमाणे तोऽज्ञात्वा मातृपुत्रौ द्विजोत्तमः ॥ ३ ॥ इयं ते जननी ख्या
ता स्वयमस्यास्तनुजस्तथा ॥ ४ ॥ तीर्थयोः स्नानमात्रेण भव
तोः पातकं गतं ॥ विवेकस्य वचः श्रुत्वा तावुभौ खिन्नमानसौ
॥ विमलं निर्मलं गत्वा जग्महातोरशनं व्रतं ॥ तत्रैव मरणं प्राप्य
तीर्थयोश्च प्रभावेन ततः दिव्यं विमानमारूढ कैलासं च प्र
जग्मतुः ॥ ६ ॥ छ विमलतीर्थस्य निर्मलस्य तथैव च ॥ आख्या
नं पुण्यजनकं महापातकनाशनं ॥ तत्र स्नानं प्रकर्तव्यं दानं
दद्याद्द्विजातये ॥ श्राद्धं चैव प्रकर्तव्यं पितॄणां हितहेतवे ॥
विमलनिर्मलयोर्महिमा मया निगदितो भवतेऽन्यः पठ
ति यः शृणुते परवक्त्रतः स कलिकल्मषतः परिमुच्यते ॥ ८० ॥

॥ ५३ ॥

तिसदार

86

लै२

इति श्रीपद्मपुराणे त्र्यंबकक्षेत्रमाहात्म्ये द्वाविंशोऽध्यायः ॥ २२ ॥ ७ ॥

नंदिरुवाच ॥ ततो वैतरणीं गच्छेत् ऽउऽ स्नानमाचरेत् ॥ तर्पणं तत्र
कर्तव्यं पितृणां तृप्तिहेतवे ॥ श्राद्धं चैव प्रकर्त्तव्यं केदमस्ल फलं त्वपि ॥
अत्र वैतरणी धेनुर्दातव्या न्टपसत्तम ॥ यमद्वारपथे घोरे हरस्वं
वैतरणी नदी ॥ तां महेता तु मिच्छा मि गामि मां प्रददाम्यहं ॥ इति मं
त्रं समुच्चार्य धेनुं दद्याद्द्विजातये ॥ इयं वैतरणी साक्षाद्गावेति
न संशयः ॥ तत्र दानानि देयानि यथाशक्त्या न्टपोत्तम ॥ पुरा वे
ता सुरे नाम दानवोऽतीव भीषणा ॥ अस्मात् दे: कंदर्यां सन्निदृन्आ
सीन्महावने ॥ प्रदक्षिणार्थ नोल्लोकां स्तर्जयन्स निरंतरं ॥ वे
तासुरेणा संरुद्धे तस्मिन्मार्गे दुरासना ॥ प्रदक्षिणार्थ नोल्लोकानय

87

युस्तेन वर्मणा ॥ ७ ॥ कदाचिन्नैमिषारण्यवासिनो मुनिसत्तमाः ॥
तीर्थयात्राप्रसंगेन त्र्यंबकक्षेत्रमाययुः ॥ ८ ॥ तत्र तीर्थविधिं कृत्वा गिरिः
कर्तुं प्रदक्षिणां ॥ मनोदधुस्तदा तेभ्यः कथितं तीर्थवासिभिः ॥ अत्र वेता
सुरो नाम दानवोतीव भीषणः ॥ स हंतु भक्षणान्मार्गे तत्र गंतुं न शक्य
ते ॥ इति तद्वचनं श्रुत्वा मुनयो गौतमं ययुः ॥ तस्मै निवेदयामासु दानव
स्य विचेष्टितं ॥ प्रदक्षिणार्थिनो ब्रह्मन्वयं सर्वे द्विजातयः ॥ अयं त्व
दाश्रमो ब्रह्मन् ॥ त्वयायं परिरक्षितः ॥ वेतासुरविनाशाय प्रयत्नं
कुरु गौतम ॥ इति तद्वचनं श्रुत्वा गौतमो मुनिसत्तमः ॥ त्र्यंबकं प्रार्थ
यामास वेतासुरवधेच्छया ॥ गौतमः प्रार्थितः शंभुर्वेतासुरगुहां
ययौ ॥ वेतासुरोपि तं दृष्ट्वा धन्योहमिति चिंतयन् ॥ मुष्टिमुद्य

॥ ५४ ॥

३१

न्यवेगेन त्र्यंबकंहेतुमाययौ ॥ तत्र युद्धमभूद्घोरं शिवदानवयोर्भृशं ॥
उद्धृय तच्छिरो लग्नं त्र्यंबकस्य शिरः प्रति ॥ जटायाश्चैव पांचत्रे
तच्छिरः शिवमस्तके ॥ ततः प्रादुरभूद्धरिगांगं कल्मषनाशनं ॥ गौ
तमः प्रार्थयामास पश्चिमांबुधिगाननं ॥ लोकानां तारणार्थी
य देहि गांगं जगत्प्रभो ॥ तथेत्युक्त्वा महादेवस्तत्रैवांररधीयत ॥
वैतालसुरोमद्धो जाता तस्मादैतरणीस्मृता ॥ तस्यां स्नानं च दा
नं च कोटियज्ञफलप्रदं ॥ इति श्रीपद्मपुराणे त्र्यंबकक्षेत्रमाहा
त्म्ये त्रयोविंशतिमोध्यायः ॥ २३ ॥ नंदउवाच ॥ अत्र धेनुप्रदान
स्यश्रयु हेतुं नराधिप ॥ अभक्षं भक्षयस्येति महादेवेन

89

शापिता ॥ कामधेनुस्तापञ्चक्रे सा वैतरणीतटे ॥ ध्यायंती शं
करं देवं निराहारा यतव्रता ॥ अल्पेनैव च कालेन परितुष्टः सदा
शिवः ॥ धेनोः प्रत्यक्षतामेत्य वरं ब्रूहीति चाब्रवीत् ॥ धेनुरु॰ ॥
प्रसादाद्भवतः शंभो निषिद्धभक्ष्या हृता पुरा ॥ अधुना शापमो
क्षं मे कुरुष्व तु सुरेश्वर ॥ शिव उ॰ ॥ मदुक्तं नान्यथाभावि का ॥५५॥
मधेनो कथंचन ॥ तथापि तपसानेन तोषितोस्मि ददामि ते ॥
पुरीषं तव मूत्रं च पवित्रं संभविष्यति ॥ त्वया विना न यज्ञस्य
सांगता स्यात्कदाचन ॥ इति शंभुर्वरं दत्वा तत्रैवांतरधी
यत ॥ तदारभ्य च न पश्येत् तु ॥ शांकरस्या सया जनैः ॥ अत्र
वैतरणी धेनुर्दीयते पापशांतये ॥ केतव्या पिहित छुत्वा कु

प्रच्छ पश्चाद्वा पुरतोथ वा॥ दर्षीवल्लस्ततः प्राह पुरस्तादेवसं
निधिं॥ दर्षीवल्लोक मार्गेपि त्र्यंबकं प्राप्तवान् द्विजः॥ एतस्मि
न्नंतरे तस्य ग्रामे राज्ञा श्रुतं नृप॥ कर्षकोग्राम मुख्यस्य दारि
द्र्य प्रपीडितः॥ स्वकुटुंब समादाय प्रययौ त्र्यंबकं प्रति॥ स्वरा
ज्याति दुःखितः प्राह धिग्मो धिग्मम जीवितं॥ यस्य ग्रामेस मु
ख्यश्च ब्राह्मणपायां निर्यान्यतः॥ आनयंतु द्विजं शिघ्रं स कुटु
बं प्रति॥ स जी राज्ञा मम आज्ञया॥ ग्रामं तस्मै प्रदास्यामि बहुस
स्य समन्वितं॥ इत्युक्ता प्रेषितं दूतं॥ स दूतः पथि मीलितः॥ कृषी
कः सह तेनैव राजानं समुपाययौ॥ राज्ञो दर्शन मात्रेण प्रसन्नः व
तः स द्विजोत्तमः॥ ग्राममेकं ददौ तस्मै बहुसस्य समन्वितं॥

मर   नेर

वरघे गोधनं तस्यग्रहेन महद्धृतं ॥ वेदाश्च पठितस्तेन सांगाः शा
स्त्रा सान्विताः ॥ इष्टं च बहुभिर्यज्ञैर्दत्ताश्च बहुदक्षिणाः ॥ ततो
बहुतिते काले कर्षको मरणं गतः ॥ दिव्यं विमानमारुह्य शक्र
स्य समतां ययौ ॥ इंद्रस्यार्द्धासनं भेजे बहुदेवप्रपूजितं ॥ अ
र्द्धासनगतं विप्रं शक्रः कोपसमन्वितः ॥ किमनेन कृतं पुण्यं
मित्युवाच बृहस्पतिं ॥ बृहस्पतिस्कृत घृत्वा ध्यान
दृष्ट्या विलोक्य च ॥ शक्राय कथयामास गुह्यमेतद्विशे
षतः ॥ प्रदक्षिणादरतानेन प्रसादेः सर्वजन्मनि ॥ तेन पु
ण्यप्रभावेन भुक्ता भोगानयं पोषितान ॥ ततोर्द्धासनं

५८   ॥५६॥

रगावर्त्तस्यसंनिधौ ॥ ध्यायेतीसंकरंदेवंततापपरमंतपः ॥ शि
वः प्रसन्नस्तामेत्यवरंब्रूहीतिचाब्रवीत् ॥ केतक्युवाच ॥ अ
स्तु स्नाहं महादेव विहिताभुवनत्रये ॥ सापमोक्षोयथामेस्यात्त
थादेवविधीयतां ॥ शिवउ० ॥ विष्णवाद्यादेवताःस्वर्वाधिरिष्यंति
शिरःसुहि ॥ मांविनासर्वदेवानांवल्लभासंभविष्यति ॥ त्वया
यन्निर्मितंतीर्थंकेतकीतीर्थनामकं ॥ लोकानामुपकारायेभ
विष्यतिमहीतले ॥ नंद्युवाच ॥ इतिशंभुर्वरंदत्वातत्रैवांतरधी
यत ॥ तदाप्रभृतिलोकेषुकेतकीहरिजितान्नैः ॥ वैतरण्याः
समुत्पत्तिःकथितातेमयानघ ॥ केतक्याःकामधेनोश्चरा

॥५६॥

